त० । २दूरत्वे न०ब० । ३सन्निकर्षशून्ये दूरस्थे त्रि० ।

**असन्निकृष्ट** त्रि० विरोधे न०त० । १दूरस्थे ।

**असन्निधि** पु० अभावे न०त० । १नैकट्याभावे" विरोधे न० त० । २दूरत्वे । न० ब० । ३दूरस्थे त्रि० ।

**असन्निहित** त्रि० विरोधे न०त० । १दूरस्थे । २असम्यग्निवेशिते च ।

**असपत्न** त्रि० विरोधे न०त० । १शत्रुभिन्ने मित्रे न०ब० । २शत्रुशून्ये त्रि० "इमं देवा असपत्नम्" यजु०९,४, स्त्रियां शार० ङीन् "असपत्नी सपत्नघ्नी जयन्त्यभिभूवरी" ऋ० १०, १५९,५ । यज्ञे उपाधीयमाने इष्टकाभेदे "पञ्चस्यामन्तेष्वश्विनीवदसपत्नी" कात्या० १७,११,१ । 'असपत्नी इष्टका' कर्क० ।

**असपिण्ड** पुंस्त्री० न समानः पिण्डः देहारम्भकावयवभेदो यस्य । सप्तमपुरुषाद्यनन्तर्गतयोः स्त्रीपुरुषयोः । "असपिण्डा च या मातुरसगोत्रा च या पितुः" मनुः असपिण्डः सपिण्डो वा गृहीतस्योपनायितः" स्मृतिः । सपिण्डशब्दनिर्वचनेन च सापिण्ड्यं मिताक्षराकृता "अनन्यपूर्व्विकां कान्तामसपिण्डां यवीयसीमिति" या० स्मृतिव्याख्याने दर्शितम् । असपिण्डां समान एकः पिण्डोदेहो यस्याः सा सपिण्डा न सपिण्डा असपिण्डा ताम् । सपिण्डता चैकशरीरावयवान्वयेन पित्रा सह एकपिण्डता । एवम्पितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात् । एवं मातृशरीरावयवान्वयेन मात्रा । तथा मातामहादिभिरपि मातृद्वारेण । तथा मातृष्वसृमातुलादिभिरपि एकशरीरावयबान्वयात् । तथा पितृव्यपितृष्वस्रादिभिरपि । तथा पत्या सह पत्न्या एकशरीरारम्भकतया । एवं भ्रातृभार्य्याणामपि परस्परमेकशरीरारम्भैः सह एकशरीरारम्भकत्वेन । एवं यत्र यत्र सपिण्डशब्दः तत्र तत्र साक्षात् परम्परया वा एकशरीरावयवान्वयो वेदितव्यः । अवश्यञ्चैकशरीरवयवान्वयेन सापिण्ड्यं वर्णनीयम् । "आत्मा हि जज्ञ आत्मन इत्यादि" श्रुतेः तथा "प्रजामनु प्रजायसे" इति तथा "स एवायन्निरूढः पृथक् पृथक् प्रत्यक्षेणोपलभ्यत" इत्यापस्तम्बवचनाच्च । तथा गर्भोपनिषदि । 'एतत्षाट्कौशिकं शरीरन्त्रीणि मातृतस्त्रीणि पितृतः अस्थिस्नायुमज्जानः पितृतः । त्वङ्मांसरुधिराणि मातृत" इति । तत्र तत्रावयवान्वयप्रतिपादनात् । निर्व्वाप्यपिण्डान्वयेन तु सापिण्ड्ये मातृसन्ताने भ्रातृव्यादिषु च सापिण्ड्यं न स्यात् । समुदायशक्त्यङ्गीकारेण रूढ़परिग्रहे अवयवशक्तिस्तत्र तत्रावगम्यमाना परित्यक्ता स्यात् । "असत्स्ववयवार्थेषु योऽन्यत्रार्थे प्रयुज्यते । तत्रानन्यगतित्वेन समुदायः प्रसिध्यति" । एवम्पारम्पर्य्यैकशरीरावयवान्वयेन सापिण्ड्ये यथा नातिप्रसङ्गस्तथा वक्ष्यामः" । "असपिण्डामित्यत्रैकशरीरावयवान्वयद्वारेण साक्षात् पारम्पर्य्येण वा सापिण्ड्यमुक्तन्तच्च सर्व्वस्य सर्वत्र यथाकथञ्चिदनादौ संसारे सम्भवतीत्यतिप्रसङ्ग इत्यत आह" । "पञ्चमात्सप्तमादूर्द्ध्वं मातृतः पितृतस्तथा" या० स्मृ० । "मातृतोमातृसन्ताने पञ्चमादूर्द्ध्वम् । पितृतः पितुः सन्ताने सप्तमादूर्द्ध्वं सापिण्ड्यं निवर्त्तते इति शेषः । ततश्चायं सपिण्डशब्दोऽवयवशक्त्या सर्व्वत्र प्रवर्त्तमानोऽपि निर्म्मथ्य पङ्कजादिशब्दवन्नियतविषय एव । तथा च पित्रादयः षट् सपिण्डाः पुत्रादयश्च षडात्मा च सप्तमः । सन्तानभेदेऽपि यतः सन्तानभेदः, तमादाय गणयेद्यावत्सप्तम इति सर्वत्र योजनीयम् । तथा च मातरमारभ्य तत्पितृपितामहादिगणनायां पञ्चमपुरुषसन्तानवर्त्तिनी मातृतः पञ्चमीत्युपचर्यते एवं पितरमारभ्य तत्पित्रादिगणनायां सप्तमपुरुषसन्तानवर्त्तिनो पितृतः सप्तमीति" मिता० । एवमेवाशौचेऽपि सापिण्ड्यम् पितृपक्षीयं ज्ञेयं अदत्तस्त्रीणां तु त्रिपौरुषं सापिण्ड्यम् दत्तानां तु सगोत्रत्वाभावान्नाशौचमिति" भेदः दायग्रहणोपयोगिसापिण्ड्यं तु दातृत्वभोक्तृत्वान्यतरसम्बन्धेनैकपिण्डवत्त्वमिति दायभागानुसारिणः ।

**असभ्य** त्रि० सभायामर्हति यत् न०त० । सभायामनुपयुक्ते १स्त्रीवर्णनादौ, २खले च ।

**असम** त्रि० नास्ति समोयस्य । १अतुल्ये । "संप्रधार्य्याब्रवीद्धाता न समौ नासमाविति" मनुः । समःयुग्मसंख्यान्वितः २तद्भिन्ने अयुग्मे विषमे (विजोड) एकत्रिपञ्चादि संख्यान्विते च यथा मेषादिषु द्वादशराशिषु मेषमिथुनसिंहतुलाधनुःकुम्भाः असमराशयः एवमन्यत्रापि । ३बुद्धभेदे पु० ।

**असमक्ष** न० न समक्षम् । १अप्रत्यक्षे अनुमित्यादिज्ञाने अव्य० अच् । २तद्विषये त्रि० ।

**असमग्र** त्रि० न०त० । असम्पूर्णे असकले ।

**असमञ्जस** न० समञ्जसं युक्तियुतं न०त० । १असङ्गते । "यद्यपि का नोहानिः परस्य द्राक्षां रासभश्चरति । असमञ्जसमिति मत्वा तथापि तरलायते चेतः" उद्भटः ।

**असमञ्जस्** पु० सम्+अन्ज—असुन् न०त० । सगरन्टपज्येष्ठपुत्रे अंशुमतः पितरि सूर्य्यवंश्ये क्षत्रियभेदे तत्कथा 'अयोध्याधिपतिः श्रीमान् पूर्व्वमासीन्नराधिपः । सगरो-